**पत्रपल्लवैरिति** अभिनवपत्रगुच्छैः तथा कोमलोज्ज्वलैश्चलद्भिः **किसलयैः** पत्रविशेषैस्तथा सुकुमालप्रवालैः शोभितानि वराङ्कुराण्यग्रशिखराणि येषां ते तथा, इह चाङ्कुर-प्रवाल-किशलयपत्राणाम् अल्प-बहु-बहुतरादिकालकृतावस्थाविशेषाद् विशेषः सम्भाव्यत इति। **निच्चं कुसुमिया निच्चं माइया** मयूरिताः, **निच्चं लवइया** पल्लविताः, **निच्चं थवइया** स्तबकवन्तः, **निच्चं गुलइया** गुल्मवन्तः, **निच्चं गोच्छिया** जातगुच्छाः, यद्यपि स्तबक-गुच्छयोरविशेषो नामकोशेऽधीतस्तथापीह विशेषो भावनीयः, **निच्चं जमलिया,** यमलतया समश्रेणितया व्यवस्थिताः, नताः, **निच्चं जुवलिया** युगलतया स्थिताः, **निच्चं विणमिया** विशेषेण फल-पुष्पभारेण, **निच्चं पणमिया** तथैव नन्तुमारब्धाः, **निच्चं कुसुमिय-माइय-लवइय-थवइय-गुलइय-गोच्छिय-जमलिय-जुवलिय-विणमिय-पणमिय-सुविभत्तपिंडि-मंजरिवडेंसगधरा,** केचित् कुसुमिताद्येकैकगुणयुक्ताः, अपरे तु समस्तगुणयुक्ताः, ततः कुसुमिताश्च ते इत्येवं कर्मधारयः, नवरं **सुविभत्ता** विविक्ता सुनिष्पन्नतया **पिण्ड्यो** लुम्ब्यः मञ्जर्यश्च प्रतीताः, ता एवावतंसकाः शेखरकाः, तान् धारयन्ति ये ते तथा, तथा[2] **सुय-बरहिण-मयणसाल-कोइल-कोभगक-भिंगारक-कोंडलक-जीवंजीवक-नंदीमुह-कविल-पिंगलक्खग-कारंड-चक्कवाय-कलहंस-सारस-अणेगसउणगणमिहुणविचरियसद्दुण्णइयमहुरसरनाइए** शुकादीनां सारसान्तानां अनेकेषां शकुनगणानां मिथुनैर्विचरितं[3][4] **शब्दोन्नतिकं** च उन्नतशब्दकं मधुरस्वरं च **नादितं** लपितं यस्मिन् स तथा, वनखण्ड इति प्रकृतम्, **सुरम्मे संपिंडियदरियभमरमहुकरिपहकरपरिलिंतमत्त-छप्पयकुसुमासवलोलमहुरगुमुगुमुगुमिंतगुंजंतदेसभागे,** सम्पिण्डिता दृप्तभ्रमरमधुकरीणां वनसत्कानामेव **पहकर** त्ति निकरा यत्र स तथा, तथा **परिलीयमाना** अन्यत आगत्य लयं यान्तो मत्तषट्पदाः कुसुमासवलोलाः किञ्जल्कलम्पटाः मधुरं गुमुगुमायमानाः गुञ्जन्तश्च शब्दविशेषं विदधानाः देशभागेषु यस्य स तथा, ततः कर्मधारयः। **अब्भंतरपुप्फफला, बाहिरपत्तुच्छन्ना, पत्तेहि य पुप्फेहि य उच्छन्नपलिच्छन्ना**[5] अत्यन्तमाच्छादिता इत्यर्थः, एतानि पुनर्वृक्षाणां विशेषणानि। **साउफले** मिष्टफले, इतो वनखण्डस्य भूयो विशेषणानि, **निरोयए** रोगवर्जितः, **णाणाविहगुच्छगुम्ममंडवगसोहिए, विचित्तसुहकेउभूए,** विचित्रान् शुभान् केतून् ध्वजान् भूतः प्राप्तः, **वावि-पुक्खरिणि-दीहियासु य सुनिवेसियरम्मजालहरए,** वापीषु चतुरस्रासु पुष्करिणीषु वृत्तासु पुष्करवतीषु वा दीर्घिकासु च ऋजुसारणीषु सुष्ठु निवेशितानि रम्याणि जालगृहकाणि यत्र स तथा। **पिंडिमनीहारिमं**[6] **सुगंधिं सुहसुरभिमणहरं च महया गंधद्धणिं**[7] **मुंचंता,**[8] पिण्डिमनिर्हारिमां पुद्गलसमूहरूपां दूरदेशगामिनीं च सुगन्धिं सद्गन्धिकां शुभसुरभिभ्यो गन्धान्तरेभ्यः सकाशान्मनोहरा या सा तथा, तां च महता मोचनप्रकारेण विभक्तिव्यत्ययात् महतीं वा गन्ध एव घ्राणिहेतुत्वात् तृप्तिकारित्वाद् गन्धघ्राणिस्तां मुञ्चन्त इति वृक्षविशेषणम्, एवमितोऽन्यान्यपि, **णाणाविहगुच्छगुम्ममंडवकघरकसुहसेउकेउबहुला,** नानाविधाः गुच्छा गुल्मानि मण्डपका गृहकाणि च येषां सन्ति ते तथा, तथा शुभाः **सेतवो** मार्गा आलवालपाल्यो वा **केतवश्च** ध्वजा **बहुला** बहवो येषां ते तथा, ततः कर्मधारयः, **अणेगरहजाणजोग्गसिबियपवि-**

---

१. हे १ खं० विना—किसिलयैः जे १, २, ३, लों० ॥ २. तथा सुय° जे २ लों० विना ॥ ३. °विचलियस° खं०। °विचरियः स° जे १ ॥ ४. मिथुनैर्विरचितं लों० खं० हे १ जे २ मु०। मिथुनैर्विरचरितं जे ३। औपपातिकवृत्तौ 'मिथुनैर्विचरितम्' इति पाठः॥ ५. °पलिच्छिन्ना हे १॥ ६. जे २, ३ विना—°हरिमसुगंधिसुह° जे १। °हारिमं सुगंधिसुह° लों० खं०। °हारिसुगंधिसुह° हे १॥ ७. °धद्धाणिं मुं० हे १। °धघणिं जे ३ खं० ॥ ८. मुयंता लों० ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मोयणा अनेकेषां रथादीनामधोऽतिविस्तीर्णत्वात् प्रविमोचनं येषु ते तथा, सुरम्मा पासाईया दरिसणिज्जा अभिरूवा पडिरूवा।

तस्स णं वणसंडस्स बहुमज्झदेसभागे एत्थ णं महं एक्के असोगवरपायवे पण्णत्ते कुस-विकुसविसुद्धरुक्खमूले, कुशा दर्भा विकुशा वल्वजादयस्तैर्विशुद्धं विरहितं वृक्षानुरूपं मूलं समीपं यस्य स तथा, मूलमंते इत्यादिविशेषणानि पूर्ववद् वाच्यानि यावत् पडिरूवे।

से णं असोगवरपायवे अन्नेहिं बहूहिं तिलएहिं लउएहिं छत्तोएहिं[1] सिरीसेहिं सत्तवन्नेहिं[2] दहिवन्नेहिं[3] लोद्धेहिं धवेहिं चंदणेहिं अज्जुणेहिं निंबेहिं[4] कुडएहिं कलंबेहिं सव्वेहिं फणसेहिं सालेहिं[5] तमालेहिं पियएहिं[6] पियंगूहिं पुरोवएहिं रायरुक्खेहिं नंदिरुक्खेहिं सव्वओ समंता संपरिक्खित्ते, ते णं तिलया लउया[7] जाव नंदिरुक्खा कुस-विकुसविसुद्धरुक्खमूला मूलमंतो इत्यादि पूर्ववत्, यावत् पडिरूवा।

ते णं तिलया जाव नंदिरुक्खा अन्नाहिं बहूहिं पउमलयाहिं नागलयाहिं असोगलयाहिं चंपयलयाहिं चूयलयाहिं वणलयाहिं वासंतियलयाहिं[8] कुंदलयाहिं सामलयाहिं सव्वओ समंता संपरिक्खित्ता। ताओ णं पउमलयाओ निच्चं कुसुमिया जाव पडिरूवाओ।

तस्स णं असोगवरपायवस्स हेट्ठा ईसिंखंधीसमल्लीणे[9] स्कन्धासन्नमित्यर्थः[10] एत्थ णं महं एक्के पुढविसिलापट्टए पण्णत्ते, एत्थ णं ति शब्दोऽशोकवरपादपस्य यदधोऽत्रेत्येवं सम्बन्धनीयः। विक्खंभायामसुप्पमाणे किण्हे अंजणक-वाण-कुवलय-हलहरकोसेज-आगास-केस-कज्जलंगी-खंजण-सिंगभेय-रिट्ठय-जंबूफल-असणक-सणबंधण-नीलुप्पलपत्तनिकर-अयसिकुसुमप्पयासे नील इत्यर्थः, अञ्जनको वनस्पतिः, हलधरकौशेयं बलदेववस्त्रम्, कज्जलाङ्गी कज्जलगृहम्, शृङ्गभेदो महिषादि-विषाणच्छेदः, रिष्ठकं रत्नम्, असनको बीयकाभिधानो वनस्पतिः, सनबन्धनं सनपुष्पवृन्तम्। मरकत-मसार-कडित्त-नयणकीयरासिवन्ने, मरकतं रत्नम्, मसारो मसृणीकारकः पाषाणविशेषः, कडित्तं ति कडित्रं कृत्तिविशेषः, नयनकीका नेत्रमध्यतारा तद्राशिवर्णः काल इत्यर्थः निद्धघणे स्निग्धघनः, अट्ठसिरे अष्टशिराः अष्टकोण इत्यर्थः। आयंसतलोवमे सुरम्मे ईहामिग-उसभ-तुरग-नर-मगर-वालग-किन्नर-रुरु-सरभ-चमर-वणलय-पउमलयभत्तिचित्ते, ईहामृगाः वृकाः, व्यालकाः श्वापदभुजगाः, आईणग-रूय-बूर-णवणीय-तूलफासे, आजिनकं चर्ममयं वस्त्रम्, रूतं प्रतीतम्, बूरो वनस्पतिविशेषः, तूलं अर्कतूलम्। सीहासणसंठिए पासाईए जाव पडिरूवे ति।" इति आचार्यश्रीअभयदेवसूरिविरचितायां ज्ञाताधर्मकथाटीकायाम् पृ० ३—६।

पृ० ३ पं० १. वण्णओ। दृश्यतामस्मिन्नेव परिशिष्टे पृ० ४९ पं० १५ इत्यस्य टिप्पणम्। अयं पाठ औपपातिकसूत्रे इत्थं वर्तते—" तत्थ णं चंपाए णयरीए कूणिए णाम राया परिवसइ, महयाहि-मवंतमहंतमलयमंदरमहिंदसारे अच्चंतविसुद्धदीहरायकुलवंससुप्पसूते णिरंतरं रायलक्खणविराइ-अंगमंगे, बहुजणबहुमाणे पूजिते सव्वगुणसमिद्धे खत्तिए मुइते मुद्धाहिसित्ते माउपिउसुजाते दयपत्ते सीमंकरे सीमंधरे खेमंकरे खेमंधरे मणुस्सिंदे जणवयपिया जणवयपाले जणवयपुरोहिते

---

१. जे २, ३ विना—छत्ताएहिं जे १ हे १। 'छत्ताएहिं' पाठः खं० लों०मध्ये नास्ति एव॥ २. सत्तिवन्नेहिं जे २, ३। सत्तहिं खं०॥ ३. दहिवन्नेहिं नास्ति लों० खं०॥ ४. निबेहिं जे ३॥ ५. तालेहिं हे १॥ ६. पिएहिं खं० जे ३॥ ७. लउया याव खं०। लयाओ जाव लों० जे १। लउया हे १ मध्ये पाठः एव नास्ति॥ ८. वासंतिल° खं० जे ३॥ ९. ईसक्खंधीसमल्लीणे जे १। ईसिक्खंधमल्लीणे हे १। ईसिक्खंधीसमल्लीणे लों०। ईसि खंध समल्लीणे जे २॥ १०. '°सन्न इत्यर्थः' इति औपपातिकसूत्रवृत्तौ॥

सेउकरे केउकरे णरपवरे पुरिसवरे पुरिससीहे पुरिसवग्घे पुरिसासीविसे पुरिसपुंडरीए पुरिसवरगंधहत्थी अड्ढे दित्ते वित्ते विच्छिण्णविउलभवण-सयणा-ऽऽसण-जाण-वाहणाइण्णे बहुधण-बहुजातरूवरयते आओगपओगसंपउत्ते विच्छड्डियपउरभत्तपाणे बहुदासी-दास-गो-महिस-गवेलकप्पभूते पडिपुण्णजंत-कोस-कोट्ठागाराउधागारे बलवं दुब्बलपच्चामित्ते ओहतकंटयं निहयकंटयं मलियकंटयं उद्धियकंटयं अकंटयं ओहतसत्तुं णिहतसत्तुं मलितसत्तुं उद्धियसत्तुं निजियसत्तुं पराइयसत्तुं ववगयदुब्भिक्खं मारिभयविप्पमुक्कं खेमं सिवं सुभिक्खं पसंतडिंबडमरं रज्जं पसाहेमाणे विहरति।"

अस्य आचार्यश्री अभयदेवसूरिभिर्व्याख्या एवं विहितास्ति—"राजवर्णके लिख्यते—महयाहिमवंतमहंतमलयमंदरमहिंदसारे, महाहिमवानिव महान् शेषराजपर्वतापेक्षया, तथा मलयः पर्वतविशेषः, मन्दरो मेरुः, महेन्द्रः पर्वतविशेषः शक्रो वा, तद्वत् सारः प्रधानो यः स तथा। अच्चंतविसुद्धदीहरायकुलवंससुप्पसूए, अत्यन्तविशुद्धोऽतिनिर्दोषो दीर्घश्चिरकालीनो यो राज्ञां कुलरूपो वंशस्तत्र सुष्ठु प्रसूतो यः स तथा। निरंतरं रायलक्खणविराइयंगमंगे, राजलक्षणैः स्वस्तिकादिभिः विराजितं अङ्गमङ्गं गात्रं यस्य स तथा, मकारस्तु प्राकृतशैलीप्रभवः। मुदिए त्ति मुदितः प्रमोदवान्, अथवा निर्दोषमातृकः, यदाह—'मुइओ जो होइ जोणिसुद्धो उ' [ ] त्ति। मुद्धाभिसित्ते त्ति पितृ-पितामहादिभिः राजभिर्वा यो राज्येऽभिषिक्तः। माउपिउसुजाए त्ति पित्रोर्विनीततया सत्पुत्रः। दयपत्ते त्ति प्राप्तकरुणागुणः। सीमंकरे त्ति सीमाकारी मर्यादाकारीत्यर्थः। सीमंधरे त्ति कृतमर्यादापालकः। एवं खेमंकरे खेमंधरे त्ति, खेमं पुनरनुपद्रवता। मणुस्सिंदे त्ति मनुजेषु परमेश्वरत्वात्। जणवयपिय त्ति जनपदानां पितेव हितत्वात्। जणवयपाले त्ति तद्रक्षकत्वात्। जणवयपुरोहिए त्ति जनपदस्य शान्तिकारित्वात्। सेउकरे त्ति मार्गदर्शक इत्यर्थः। केउकरे त्ति अद्भुतकार्यकारित्वेन चिह्नकारी। नरप्पवरे त्ति नराः प्रवरास्तस्येति कृत्वा। पुरिसवरे त्ति पुरुषाणां मध्ये प्रधानत्वात्। पुरिससीहे त्ति शूरत्वात्। पुरिसवग्घे त्ति रोषे सति रौद्ररूपत्वात्। पुरिसासीविसे त्ति पुरुषश्चासावाशीविष इवाशीविषश्च पुरुषाशीविषः, आशीविषश्च सर्पः कोपसाफल्यकरणसामर्थ्यात्। पुरिसपुंडरीए त्ति सुखार्थिना सेव्यत्वात्, पुण्डरीकं च सितपत्रम्। पुरिसवरगंधहत्थी प्रतिराजगजभञ्जकत्वात्। अड्ढे त्ति समृद्धः। दित्ते त्ति दृप्तो दर्पवान्। वित्ते त्ति प्रसिद्धः। विच्छिण्ण-विउलभवण-सयणा-ऽऽसण-जाणवाहणाइण्णे त्ति विस्तीर्णानि विस्तारवन्ति विपुलानि प्रभूतानि भवन-शयना-ऽऽसनानि प्रतीतानि यस्य स तथा, यानवाहनानि रथाश्वादीनि आकीर्णानि गुणाकीर्णानि यस्य स तथा, ततः कर्मधारयः, अथवा विस्तीर्णविपुलभवनानि शयनासनयानवाहनाकीर्णानि यस्य स तथा। बहुधण-बहुजायरूवरयते, बहु प्रभूतं धनं गणिमादिकं बहुनी च जातरूप-रजते सुवर्ण-रूप्ये यस्य स तथा। आयोगपओगसंपउत्ते, आयोगस्य अर्थलाभस्य प्रयोगा उपायाः सम्प्रयुक्ताः व्यापारिता येन, तेषु वा सम्प्रयुक्तो व्यापृतो यः स तथा। विच्छड्डियपउरभत्तपाणे, विच्छर्दिते त्यक्ते बहुजनभोजनदानेनावशिष्टोच्छिष्टसम्भवात् सञ्जातविच्छर्दे वा नानाविधे प्रचुरे भक्तपाने भोजनपानीये यस्य स तथा। बहुदासी-दास-गो-महिस-गवेलगप्पभूए, बहवो दासीदासाः गो-महिष-गवेलकाश्च प्रभूता यस्य स तथा, गवेलका उरभ्राः। पडिपुण्णजंत-कोस-कोट्ठागाराउहागारे, प्रतिपूर्णानि यन्त्राणि पाषाणक्षेपयन्त्रादीनि कोशो भाण्डागारं कोष्ठागारं च धान्यगृहम् आयुधागारं च प्रहरणशाला यस्य स तथा। बलवं ति प्रभूतसैन्यः। दुब्बलपच्चामित्ते त्ति दुर्बलाः प्रत्यमित्राः प्रातिवेश्मिकनृपा यस्य स तथा। ओहयकंटयं ति उपहता विनाशिताः कण्टकाः प्रतिस्पर्धिगोत्रजा यत्र राज्ये तत्तथा, क्रियाया वा विशेषणमेतत्। एवमन्यान्यपि, नवरं निहताः कृतसमृद्धयपहाराः, मलिताः कृतमानभङ्गाः, उद्धृताः देशान्निर्वासिताः, अत एवा-

विद्यमाना इति। तथा शत्रवोऽगोत्रजाः निर्जिताः स्वसौन्दर्यातिशयेन परिभूताः। पराजितास्तु तद्विधराज्योपार्जने कृतसम्भावनाभङ्गाः। ववगयदुब्भिक्खं मारिभयविप्पमुक्कमिति व्यक्तम्। पसंतडिंबडमरं ति डिम्बानि विघ्नाः डमराणि राजकुमारादिकृतवैराज्यादीनि। पसंताहियडमरं ति क्वचित् पाठः, तत्राहितडमरं शत्रुकृतविड्वरोऽधिकविड्वरो वा। रज्जं पसासेमाणे त्ति प्रशासयन् पालयन्, पसाहेमाणे ति क्वचित् पाठः, तत्राप्ययमेवार्थः। विहरति वर्तते।" इति औपपातिकसूत्रवृत्तौ।

ज्ञाताधर्मकथाटीकायां पुनरित्थं व्याख्यातम्—"कूणिए नामं राय त्ति कूणिकनामा श्रेणिकराजपुत्रो राजा होत्थ त्ति अभवत्। वन्नओ त्ति तद्वर्णको वाच्यः, स च महयाहिमवंतमहंतमलयमंदरमहिंदसारे इत्यादि पसंतडिंबडमरं रज्जं पसासेमाणे विहरति इत्येतदन्तः। तत्र महाहिमवानिव महान् शेषराजापेक्षया, तथा मलयः पर्वतविशेषः, मन्दरो मेरुः, महेन्द्रः शक्रादिदेवराजः, तद्वत् सारः प्रधानो यः स तथा, तथा प्रशान्तानि डिम्बानि विघ्नाः डमराणि राजकुमारादिकृतविड्वरा यस्मिंस्तत् तथा, प्रसाधयन् पालयन्, विहरति आस्ते स्मेति, समग्रं पुनरग्रे व्याख्यास्यामः।" इति ज्ञाताधर्मकथाटीकायाम् पृ० ६। दृश्यतामस्मिन्नेव परिशिष्टे पृ० ४९ पं० १५ इत्यस्य टिप्पणम्।

पृ० ७ पं० ६. वण्णओ। "वण्णओ त्ति वर्णको वाच्यः, स च वक्ष्यमाणधारिण्या इव दृश्यः" इति ज्ञाताधर्मकथाटीकायाम् पृ० १०-११। दृश्यतामस्मिन्नेव परिशिष्टे पृ० ८ पं० १-२ इत्यस्य टिप्पणम्।

पृ० १०७ पं० १६. दिव्वे० वण्णओ। दृश्यतामस्मिन्नेव परिशिष्टे पृ० २ पं० २ इत्यस्य टिप्पणम्।

पृ० ३२१ पं० ५. वण्णओ। दृश्यतामत्रैव परिशिष्टे पृ० १ पं० १, पृ० ३ पं० १ इत्यस्य टिप्पणम्।

* * * *

पृ० ४ पं० ९. सत्तुस्सेहे जाव। "ते णं काले णं ते णं समएणं समणस्स भगवओ महावीरस्स जेट्ठे अंतेवासी इंदभूई नामं अणगारे गोयमसगोत्तेणं सत्तुस्सेहे समचउरंससंठाणसंठिए वइरोसहनारायसंघयणे कणगपुलकनिग्घसपम्हगोरे उग्गतवे दित्ततवे तत्ततवे महातवे घोरतवे उ(ओ?)राले घोरे घोरगुणे घोरतवस्सी घोरबंभचेरवासी उच्छूढसरीरे संखित्तविउलतेअलेस्से समणस्स भगवओ महावीरस्स अदूरसामंते...विहरति" इति औपपातिकसूत्रे पाठः।

"सत्तुस्सेहे त्ति सप्तहस्तोच्छ्रयः, यावत्करणादिदं दृश्यम्—समचउरंससंठाणसंठिए वज्जरिसहनारायसंघयणे कणगपुलगनिघसपम्हगोरे, कनकस्य सुवर्णस्य पुलग त्ति पुलको लवस्तस्य यो निकषः कषपट्टे रेखालक्षणः तथा पम्ह त्ति पद्मगर्भस्तद्वत् गौरो यः स तथा, वृद्धव्याख्या तु कनकस्य न लोहादेर्यः पुलकः सारो वर्णातिशयः तत्प्रधानो यो निकषो रेखा तस्य यत् पक्ष्मबहुलत्वं तद्वद् यो गौरः स कनकपुलकनिकषपक्ष्मगौरः, तथा उग्रतपाः, उग्रम् अप्रधृष्यं तपोऽस्येति कृत्वा, तथा तत्ततवे, तप्तं तापितं तपो येन स तप्ततपाः, एवं तेन तपस्तप्तं येन कर्माणि सन्ताप्य तेन तपसा स्वात्मापि तपोरूपः सन्तापितो यतोऽन्यस्यास्पृश्यमिव जातमिति, तथा महातपाः प्रशस्ततपा बृहत्तपा वा, तथा दीप्तं तपो यस्य स दीप्ततपाः, दीप्तं तु हुताशन इव ज्वलत्तेजः कर्मवनदाहकत्वात्, तथा ओराले घोरे घोरगुणे घोरतवस्सी घोरबंभचेरवासी उच्छूढसरीरे संखित्तविउलतेयलेस्से इति पूर्ववत्।" इति ज्ञाताधर्मकथाटीकायाम् पृ० ९।

पृ० ७ पं० ७. "अहीण जाव सुरूवे त्ति, इह यावत्करणादिदं द्रष्टव्यम्—अहीणपंचिंदियसरीरे, अहीनानि अन्यूनानि लक्षणतः स्वरूपतो वा पञ्चापीन्द्रियाणि यस्मिंस्तत्तथाविधं शरीरं यस्य स तथा, लक्खणवंजणगुणोववेए, लक्षणानि स्वस्तिक-चक्रादीनि व्यञ्जनानि मष-तिलकादीनि तेषां यो गुणः प्रशस्तता तेनोपेतो युक्तो यः स तथा, उप अप इत इति शब्दत्रयस्य स्थाने शकन्ध्वादिदर्शनादुपपेत इति स्यात्, माणुम्माणपमाणपडिपुण्णसुजायसव्वंगसुंदरंगे, तत्र मानं जलद्रोण-

प्रमाणता, कथम्? जलस्यातिभृते कुण्डे पुरुषे निवेशिते यज्जलं निस्सरति तद्यदि द्रोणमानं भवति तदा स पुरुषो मानप्राप्त उच्यते, तथा उन्मानम् अर्धभारप्रमाणता, कथम्? तुलारोपितः पुरुषः यद्यर्धभारं तुलति तदा स उन्मानप्राप्त इत्युच्यते, प्रमाणं स्वाङ्गुलेनाष्टोत्तरशतोच्छ्रयता, ततश्च मानोन्मानप्रमाणैः प्रतिपूर्णानि अन्यूनानि सुजातानि सुनिष्पन्नानि सर्वाणि अङ्गानि शिरःप्रभृतीनि यस्मिन् तत्तथाविधं सुन्दरमङ्गं शरीरं यस्य स तथा, ससिसोमाकारकंतपियदंसणे शशिवत् सौम्याकारं कान्तं च कमनीयमत एव प्रियं द्रष्टॄणां दर्शनं रूपं यस्य स तथा, अत एव सुरूवे त्ति सुरूप इति।" इति ज्ञाताधर्मकथाटीकायाम् पृ० ११ B।

पृ० ८ पं० १–२. जाव...जाव। औपपातिकसूत्रेऽत्र ईदृशः पाठो वर्तते—

"तस्स णं कोणियस्स रण्णो धारिणी णामं देवी होत्था, सुकुमालपाणिपाया अहीणपडिपुण्णपंचिंदियसरीरा लक्खणवंजणगुणोववेया माणुम्माणप्पमाणपडिपुण्णसुजायसव्वंगसुंदरंगी ससिसोमाकारकंतपियदंसणा सुरूवा करयलपरिमियपसत्थतिवलीवलियमज्झा कुंडलुल्लिहियगंडलेहा कोमुइरयणियरविमलपडिपुण्णसोमवयणा सिंगारागारचारुवेसा संगयगयहसियभणियविहियविलाससललियसंलावणिउणजुत्तोवयारकुसला पासादीया दरिसणिज्जा अभिरूवा पडिरूवा, कोणिएणं रण्णा भंभसारपुत्तेण सद्धिं अणुरत्ता अविरत्ता इट्ठे सद्दफरिसरसरूवगंधे पंचविहे माणुस्सए कामभोए पच्चणुभवमाणी विहरइ।" इति औपपातिकसूत्रे।

"धारिणी नाम देवी होत्था जाव सेणियस्स रण्णो इट्ठा जाव विहरइ इत्यत्र द्विर्यावच्छब्दकरणादेवं द्रष्टव्यम्—सुकुमालपाणिपाया अहीणपंचिंदियसरीरा लक्खण-वंजणगुणोववेया माणुम्माणपमाणसुजायसव्वंगसुंदरंगी ससिसोमाकारकंतपियदंसणा सुरूवा करतलपरिमिततिवलियवलियमज्झा, करतलपरिमितो मुष्टिग्राह्यस्त्रिवलीको रेखात्रयोपेतो वलितो बलवान् मध्यो मध्यभागो यस्याः सा तथा। कोमुइरयणिकरविमलपडिपुन्नसोमवयणा, कौमुदीरजनीकरवत् कार्तिकीचन्द्र इव विमलं प्रतिपूर्णं सौम्यं च वदनं यस्याः सा तथा। सिंगारागारचारुवेसा, शृङ्गारस्य रसविशेषस्य अगारमिवागारम्, अथवा शृङ्गारो मण्डनभूषणाटोपः, तत्प्रधानः आकारः आकृतिर्यस्याः सा तथा, तथा चारुर्वेषो नेपथ्यं यस्याः सा तथा, ततः कर्मधारयः। तथा संगयगयहसियभणियविहियविलाससललियसंलावणिउणजुत्तोवयारकुसला, सङ्गता उचिता गतहसितभणितविहितविलासा यस्याः सा तथा, तत्र विहितं चेष्टितम्, विलासो नेत्रचेष्टा, तथा सह ललितेन प्रसन्नतया ये संलापाः परस्परभाषणलक्षणास्तेषु निपुणा या सा तथा, युक्ता सङ्गता ये उपचारा लोकव्यवहारास्तेषु कुशला या सा तथा, ततः पदत्रयस्य कर्मधारयः। पासाईया चित्तप्रसादजनिका, दरिसणिज्जा यां पश्यच्चक्षुर्न श्राम्यति, अभिरूवा मनोज्ञरूपा, पडिरूवा द्रष्टारं द्रष्टारं प्रति रूपं यस्याः सा तथा। सेणियस्स रण्णो इट्ठा वल्लभा, कंता काम्यत्वात्, पिया सदा प्रेमविषयत्वात्, मणुन्ना सुन्दरत्वात्, नामधेज्जा नामधेयवती प्रशस्तनामधेयवतीत्यर्थः, नाम वा धार्यं हृदि धरणीयं यस्याः सा तथा, वेसासिया विश्वसनीयत्वात्, सम्मया तत्कृतकार्यस्य सम्मतत्वाद्, बहुमता बहुशो बहुभ्यो वान्येभ्यः सकाशान्मता बहुमता बहुमानपात्रं वा, अणुमया विप्रियकरणस्यापि पश्चान्मता अनुमता, भंडकरंडगसमाणा आभरणकरण्डकसमानोपादेयत्वात्, तेल्लकेला इव सुसंगोविया, तैलकेला सौराष्ट्रप्रसिद्धो मृण्मयस्तैलस्य भाजनविशेषः, स च भङ्गभयाल्लोठनभयाच्च सुष्ठु सङ्गोप्यते एवं साऽपि तथोच्यते। चेलपेडा इव सुसंपरिगिहीया वस्त्रमञ्जूषेवेत्यर्थः, रयणकरंडगो विव सुसारक्खिया सुसंरक्षितेत्यर्थः, कुत इत्याह—मा णं सीयं मा णं उण्हं मा णं दंसा

१. दृश्यतामस्मिन्नेव परिशिष्टे पृ० ५१९ मध्ये पृ० ७५ पं० ४ इत्यस्य टिप्पणम्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मा णं मसगा मा णं वाला मा णं चोरा मा णं वाइय-पित्तिय-सिंभिय-सन्निवाइय-विविहरोगायंका फुसंतु त्ति कट्टु सेणिएणं रण्णा सद्धिं विउलाइं भोगभोगाइं भुंजमाणी विहरति त्ति, माशब्दा निषेधार्थाः, णंकारा वाक्यालङ्कारार्थाः, अथवा मा णं ति मैनामिति प्राकृतत्वात्। व्यालाः श्वापदभुजगाः, रोगाः कालसहाः, आतङ्काः सद्योघातिनः, इति कट्टु इति कृत्वा इति हेतोर्भोगभोगान् अतिशयवद्भोगानिति।" इति ज्ञाताधर्मकथाटीकायाम् पृ० १३-१४।

पृ० २४ पं० ८. जाव झियाति। "यावत्करणात् करतलपल्हत्थमुही अट्टज्झाणोवगया जाव झियाइ त्ति आर्तध्यानं ध्यायतीति।" इति ज्ञाताधर्मकथाटीकायाम् पृ० ३३।

पृ० २८ पं० १८. महिड्ढीए महासोक्खे। "महर्द्धिको विमानपरिवारादिसम्पदुपेतत्वाद्, यावत्करणादिदं दृश्यम्—महाद्युतिकः शरीराभरणादिदीप्तियोगात्, महानुभागो वैक्रियादिकरणशक्तियुक्तत्वात्, महायशाः सत्कीर्तियोगात्, महाबलः पर्वताद्युत्पाटनसामर्थ्योपेतत्वात्, महासौख्यो विशिष्टसुखयोगादिति।" इति ज्ञाताधर्मकथाटीकायाम् पृ० ३४।

पृ० ३१ पं० ३. करयल०। अत्र 'करयलपरिग्गहियं दसणहं सिरसावत्तं मत्थए' इति संपूर्णः पाठः।

पृ० ३१ पं० ७, १९, पृ० ३४ पं० १७. हट्ठ०, हट्ठतुट्ठ०। अत्र 'हट्ठतुट्ठचित्तमाणंदिए पीइमणे परमसोमणंसिए हरिसवसविसप्पमाणहियये' इति सम्पूर्णः पाठः। दृश्यतां पृ० १० पं० ७।

पृ० ३२ पं० ५. चच्चर जाव। पृ० ३३ पं० ४. चच्चर०। अत्र 'चच्चर-चउम्मुह-महापहपहेसु' इति संपूर्णः पाठः। दृश्यतां पृ० २३ पं० ६।

पृ० ३५ पं० ४. रायगिहं णगरं आसिय जाव। "रायगिहं नगरं आसिय इह यावत्करणादेवं दृश्यम्—आसियसंमज्जिओवलित्तं, आसिक्तमुदकच्छटेन, संमार्जितं कचवरशोधनेन, उपलिप्तं गोमयादिना, केषु? सिंघाडग-तिग-चउक्क-चच्चर-चउमुह-महापह-पहेसु। तथा सित्तसुइयसंमट्ठरत्थंतरावणवीहियं, सिक्तानि जलेनात एव शुचीनि पवित्राणि संमृष्टानि कचवरापनयनेन रथ्यान्तराणि आपणवीथयश्च हट्टमार्गा यस्मिन् तत्तथा, मंचातिमंचकलितं, मञ्चा मालकाः प्रेक्षणकद्रष्टृजनोपवेशननिमित्तम्, अतिमञ्चाः तेषामप्युपरि ये, तैः कलितम्, णाणाविहरागभूसियज्झयपडागमंडियं, नानाविधरागैः कुसुम्भादिभिर्भूषिता ये ध्वजाः सिंह-गरुडादिरूपकोपलक्षितबृहत्पटरूपाः पताकाश्च तदितरास्ताभिर्मण्डितम्, लाउल्लोइयमहियं, लाइयं छगणादिना भूमौ लेपनम्, उल्लोइयं सेटिकादिना कुड्यादिषु धवलनम्, ताभ्यां महितं पूजितम्, ते एव वा महितं पूजनं यत्र तत्तथा, गोसीससरसरत्तचंदणदद्दरदिन्नपंचंगुलितलं, गोशीर्षस्य चन्दनविशेषस्य सरसस्य च रक्तचन्दनस्य चन्दनविशेषस्यैव दर्दरेण चपेटारूपेण दत्ता न्यस्ताः पञ्चाङ्गुलयस्तला हस्तका यस्मिन् कुड्यादिषु तत्तथा, उवचियवंदणकलसं, उपचिता उपनिहिता गृहान्तःकृतचतुष्केषु वन्दनकलशा मङ्गल्यघटाः यत्र तत्तथा, चंदणघडसुकयतोरणपडिदुवारदेसभागं, चन्दनघटाः सुष्ठुकृताः तोरणानि च प्रतिद्वारं द्वारस्य द्वारस्य देशभागेषु यत्र तत्तथा, आसत्तोसत्तविपुलवट्टवग्घारियमल्लदामकलावं, आसक्तो भूमिलग्नः उत्सक्तश्च उपरि लग्नो विपुलो वृत्तो वग्घारिय त्ति प्रलम्बो माल्यदाम्नां पुष्पमालानां कलापः समूहो यत्र तत्तथा, पंचवण्णसरससुरभिमुक्कपुप्फपुंजोवयारकलियं, पञ्चवर्णाः सरसाः सुरभयो ये मुक्ताः करप्रेरिताः पुष्पपुञ्जास्तैर्य उपचारः पूजा भूमेः तेन कलितम्। कालागरुपवरकुंदुरुक्कतुरुक्कधूवडज्झंतमघमघंतगंधुद्धुयाभिरामं, कुन्दुरुक्कं चीडा तुरुष्कं सिल्हकम्, सुगंधवरगंधियं गंधवट्टिभूयं नड-नट्टग-जल्ल-मल्ल-मुट्ठिय-वेलंबग-कहकहग-पवग-लासग-आइक्खग-लंख-मंख-तूणइल्ल-तुंबवीणिय-अणेगतालायरपरिगीयं, तत्र नटा नाटकानां नाटयितारः, नर्तका ये नृत्यन्ति, अङ्किला इत्येके, जल्ला वरत्राखेलका, राज्ञः स्तोत्रपाठका इत्यन्ये, मल्लाः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रतीताः, मौष्टिका मल्ला एव ये मुष्टिभिः प्रहरन्ति, विडम्बकाः विदूषकाः, कथाकथकाः प्रतीताः, प्लवका ये उत्प्लवन्ते नद्यादिकं वा तरन्ति, लासकाः ये रासकान् गायन्ति जयशब्दप्रयोक्तारो वा भाण्डा इत्यर्थः, आख्यायका ये शुभाशुभमाख्यान्ति, लङ्खा वंशखेलकाः, मङ्खाः चित्रफलकहस्ता भिक्षाटाः, तूणइल्लाः तूणाभिधानवाद्यविशेषवन्तः, तुम्बवीणका वीणावादकाः, अनेके ये तालाचराः तालाप्रदानेन प्रेक्षाकारिणः, तेषां परि समन्ताद् गीतं ध्वनितं यत्र तत्तथा, कुरुत स्वयं, कारयताऽन्यैः।" इति ज्ञाताधर्मकथाटीकायाम् पृ० ३९।

पृ० ३६ पं० ६, ८, ११. गणणायग जाव, मित्त-नाति० गणणायग जाव, संबंधि० गणणायग०। दृश्यतां पृ० १६ पं० ८-१०, पृ० ३६ पं० ५।

पृ० ४१ पं० १०. सिंघाडग०। दृश्यतां पृ० २३ पं० ५-६।

पृ० ४१ पं० १०-११. महया जणसद्दे त्ति वा जाव। "महया जणसद्दे इ वा, इह यावत्करणादिदं दृश्यम्—जणसमूहे इ वा जणबोले इ वा जणकलकले इ वा जणुम्मी इ वा जणुक्कलिया इ वा जणसन्निवाए इ वा बहुजणो अन्नमन्नस्स एवमाइक्खइ, एवं पन्नवेइ, एवं भासइ, एवं परूवेइ-एवं खलु देवाणुप्पिया! समणे भगवं महावीरे आइगरे तित्थगरे जाव संपाविउकामे पुव्वाणुपुव्विं चरमाणे गामाणुगामं दूइज्जमाणे इहमागए इह संपत्ते इह समोसढे इहेव रायगिहे नगरे गुणसिलए चेइए अहापडिरूवं उग्गहं उग्गिण्हित्ता संजमेणं तवसा अप्पाणं भावेमाणे विहरइ। तं महाफलं खलु भो देवाणुप्पिया! तहारूवाणं अरहंताणं भगवंताणं नामगोयस्स वि सवणयाए किमंग पुण अभिगमण-वंदण-णमंसण-पडिपुच्छण-पज्जुवासणयाए, एगस्स वि आयरियस्स धम्मियस्स सुवयणस्स सवणयाए, किमंग पुण विउलस्स अट्ठस्स गहणयाए? तं गच्छामो णं देवाणुप्पिया! समणं भगवं महावीरं वंदामो नमंसामो सक्कारेमो सम्माणेमो कल्लाणं मंगलं देवयं चेइयं पज्जुवासामो, एयं नो पेच्चभवे हियाए सुहाए खमाए निस्सेयसाए अणुगामियत्ताए भविस्सइ त्ति कट्टु त्ति।" इति ज्ञाताधर्मकथाटीकायाम् पृ० ४४।

पृ० ४१ पं० ११. बहवे उग्गा भोगा जाव। अत्र टीकाकृतां समक्षं बहवे उग्गा जाव इति पाठ आसीदिति भाति। "बहवे उग्गा, इह यावत्करणादिदं द्रष्टव्यम्—उग्गपुत्ता भोगा भोगपुत्ता एवं राइन्ना खत्तिया माहणा भडा जोहा मल्लई लेच्छई अन्ने य बहवे राईसर-तलवर-माडंबिय-कोडुंबिय-इब्भ-सेट्ठि-सेणावइ-सत्थवाहप्पभियओ अप्पेगइया वंदणवत्तियं, अप्पेगइया पूयणवत्तियं, एवं सक्कारवत्तियं, सम्माणवत्तियं, कोउहल्लवत्तियं—असुयाइं सुणिस्सामो सुइयाइं निस्संकियाइं करिस्सामो, अप्पेगइया मुंडे भवित्ता अगाराओ अणगारियं पव्वइस्सामो, अप्पेगइया पंचाणुव्वइयं सत्तसिक्खावइयं दुवालसविहं गिहिधम्मं पडिवज्जिस्सामो, अप्पेगइया जिणभत्तिरागेणं, अप्पेगइया जीयमेयं ति कट्टु ण्हाया कयबलिकम्मा कयकोउयमंगलपायच्छित्ता सिरसाकंठेमालकडा आविद्धमणिसुवन्ना कप्पिय-हारद्धहार-तिसरय-पालंब-पलंबमाण-कडिसुत्तयसुकयसोभाभरणा पवरवत्थपरिहिया चंदणोवलित्तगायसरीरा, अप्पेगइया हयगया, एवं गय-रह-सिबिया-संदमाणिगया, अप्पेगइया पायविहारचारिणो पुरिसवग्गुरापरिक्खित्ता महया उक्कुट्ठिसीहणायबोलकलकलरवेणं समुद्दरवभूयं पिव करेमाणा रायगिहस्स नगरस्स मज्झंमज्झेणं ति।

अस्यायमर्थः—शृङ्गाटकादिषु यत्र महाजनशब्दादयः यत्र बहुजनोऽन्योन्यमेवमेवमाख्यातीति वाक्यार्थः। महया जणसद्दे इ व त्ति महान् जनशब्दः परस्परालापादिरूपः, इकारो वाक्यालङ्कारार्थः, वाशब्दः पदान्तरापेक्षया समुच्चयार्थः, अथवा सद्दे इ व त्ति इह सन्धिप्रयोगादितिशब्दो द्रष्टव्यः, स चोपप्रदर्शने, यत्र महान् जनशब्द इति वा, यत्र जनव्यूह इति वा तत्समुदाय

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्यर्थः, **जनबोलः** अव्यक्तवर्णो ध्वनिः, **कलकलः**, स एवोपलभ्यमानवचनविभागः, **उर्म्मिः** सम्बाधः, एवमुत्कलिका लघुतरः समुदायः, एवं सन्निपातः अपरापरस्थानेभ्यो जनानामेकत्र मीलनम्, तत्र बहुजनोऽन्योन्यस्याख्याति सामान्येन, **प्रज्ञापयति** विशेषेण, एतदेवार्थद्वयं पदद्वयेनाह —भाषते **प्ररूपयति** चेति, अथवा **आख्याति** सामान्यतः, **प्रज्ञापयति** विशेषतः, बोधयति वा, **भाषते** व्यक्तपर्यायवचनः, **प्ररूपयति** उपपत्तितः। **इह आगए** त्ति राजगृहे, **इह संपत्ते** त्ति गुणशिलके, **इह समोसढे** त्ति साधूचितावग्रहे। एतदेवाह—**इहेव रायगिहे** इत्यादि, **अहापडिरूवं** ति यथाप्रतिरूपमुचितम् इत्यर्थः, **तमिति** तस्मात् **महाफलं** ति महत् फलम् अर्थो भवतीति गम्यम्, **तहारूवाणं** ति तत्प्रकारस्वभावानां महाफलजनस्वभावानामित्यर्थः, **नाम-गोयस्स** त्ति **नाम्नो** यादृच्छिकस्याभिधानस्य **गोत्रस्य** गुणनिष्पन्नस्य, **सवणयाए** त्ति श्रवणेन, **किमंग पुण** त्ति **किमङ्ग पुनरिति** पूर्वोक्तार्थस्य विशेषद्योतनार्थः, **अङ्गेत्यामन्त्रणे**, अथवा परिपूर्ण एवायं शब्दो विशेषणार्थ इति। **अभिगमनम्** अभिमुखगमनम्, **वन्दनं** स्तुतिः, **नमस्यनं** प्रणमनम्, **प्रतिप्रच्छनं** शरीरादिवार्ताप्रश्नः, **पर्युपासनं** सेवा, एतद्भावस्तत्ता तया, तथा **एकस्याप्यार्यस्य** आर्यप्रणेतृकत्वात् **धार्मिकस्य** धर्मप्रतिबद्धत्वात्, **वन्दामो** त्ति स्तुमः, **नमस्यामः** प्रणमामः, **सत्कारयामः** आदरं कुर्मो वस्त्राद्यर्चनं वा, **सन्मानयामः** उचितप्रतिपत्तिभिः, **कल्याणं** कल्याणहेतुम्, **मङ्गलं** दुरितोपशमहेतुम्, **दैवतं** दैवम्, **चैत्यमिव** चैत्यं **पर्युपासयामः** सेवामहे। एतत् **णो** अस्माकं **प्रेत्यभवे** जन्मान्तरे हिताय पथ्यान्नवत्, **सुखाय** शर्मणे, **क्षमाय** सङ्गतत्वाय, **निःश्रेयसाय** मोक्षाय, **आनुगामिकत्वाय** भवपरम्परासुखानुबन्धिसुखाय **भविष्यतीति** कृत्वा इति हेतोर्बहव **उग्रा** आदिदेवावस्थापितारक्षवंशजाः, **उग्रपुत्राः** त एव कुमाराद्यवस्थाः, एवं **भोगाः** आदिदेवेनैवावस्थापितगुरुवंशजाताः, **राजन्या** भगवद्वयस्यवंशजाः, **क्षत्रियाः** सामान्यराजकुलीनाः, **भटाः** शौर्यवन्तः, **योधाः** तेभ्यो विशिष्टतराः, **मल्लकिनो** लेच्छकिनश्च राजविशेषाः, यथा श्रूयन्ते चेटकराजस्याष्टादश गणराजानो नव मल्लकिनो नव लेच्छकिन इति, **लेच्छइ** त्ति क्वचिद् वणिजो व्याख्याताः, **लिप्सव** इति संस्कारेणेति, **राजेश्वरादयः** प्राग्वद्, **अप्पेगइय** त्ति अप्येके केचन, **वंदणवत्तियं** ति **वन्दनप्रत्ययं** वन्दनहेतोः, **शिरसा कण्ठे च कृता** धृता **माला** यैस्ते शिरसाकण्ठेमालाकृताः, कल्पितानि हारार्धहारत्रिसरकाणि **प्रालम्बश्च** प्रलम्बमानः कटिसूत्रकं च येषां ते तथा, तथाऽन्यान्यपि सुकृतशोभान्याभरणानि येषां ते तथा, ततः कर्मधारयः, चन्दनावलिप्तानि गात्राणि यत्र तत्तथाविधं शरीरं येषां ते तथा, **पुरिसवग्गुर** त्ति पुरुषाणां वागुरेव वागुरा परिकरः, **महया** महता, **उत्कृष्टिश्च** **आनन्दमहाध्वनिः** गम्भीरध्वनिः, **सिंहनादश्च**, **बोलश्च** वर्णव्यक्तिवर्जितो ध्वनिरेव, **कलकलश्च** व्यक्तवचनः स एव, एतल्लक्षणो यो रवस्तेन, **समुद्ररवभूतमिव** जलधिशब्दप्राप्तमिव तन्मयमिवेत्यर्थो नगरमिति गम्यते **कुर्वाणाः**।" इति **ज्ञाताधर्मकथाटीकायाम्** पृ० ४४–४५।

पृ० ४९ पं० १३. **जाव भरहो इव मणुस्साणं**। "इह गमे यावत्करणादिदं दृश्यम्—**इंदो इव देवाणं, चमरो इव असुराणं, धरणो इव नागाणं, चंदो इव ताराणं ति**" इति **ज्ञाताधर्मकथाटीकायाम्** पृ० ५५।

पृ० ४९ पं० १४. **गामागरनगर जाव सन्निवेसाणं**। "**गामागर०** इह दण्डके यावत्करणादिदं दृश्यम्—**नगर-खेड-कब्बड-दोणमुह-मडंब-पट्टण-संबाह-सन्निवेसाणं आहेवच्चं पोरेवच्चं सामित्तं भट्टित्तं महत्तरगत्तं आणाईसरसेणावच्चं कारेमाणे पालेमाणे महयाहयनट्ट-गीय-वाइय-तंती-तल-ताल-तुडिय-घण-मुइंगपडुप्पवाइयरवेणं विउलाइं भोगभोगाइं भुंजमाणे विहराहि।** तत्र करादिगम्यो **ग्रामः**, **आकरो** लवणाद्युत्पत्तिभूमिः, अविद्यमानकरं **नगरम्**, धूलीप्राकारं **खेटम्**,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कुनगरं कर्बटम्, यत्र जल-स्थलमार्गाभ्यां भाण्डान्यागच्छन्ति तद् द्रोणमुखम्, यत्र योजनाभ्यन्तरे सर्वतो ग्रामादि नास्ति तद् मडम्बम्, पत्तनं द्विधा जलपत्तनं स्थलपत्तनं च, तत्र जलपत्तनं यत्र जलेन भाण्डान्यागच्छन्ति, यत्र तु स्थलेन तत् स्थलपत्तनम्। यत्र पर्वतादिदुर्गे लोका धान्यानि संवहन्ति स संवाहः, सार्थादिस्थानं सन्निवेशः, आधिपत्यं अधिपतिकर्म रक्षेत्यर्थः, पोरेवच्चं पुरोवर्तित्वमग्रेसरत्वमित्यर्थः, स्वामित्वं नायकत्वम्, भर्तृत्वं पोषकत्वम्, महत्तरकत्वम् उत्तमत्वम्, आज्ञेश्वरस्य आज्ञाप्रधानस्य सतः तथा सेनापतेर्भावः आज्ञेश्वरसेनापत्यम्, कारयन् अन्यैर्नियुक्तकैः, पालयन् स्वयमेव, महता प्रधानेन, अहय त्ति आख्यानकप्रतिबद्धं नित्यानुबन्धं वा यन्नाट्यं च नृत्यम्, गीतं च गानम्, तथा वादितानि यानि तन्त्री च वीणा, तलौ च हस्तौ, तालश्च कंसिका, तुडितानि च वादित्राणि, तथा घनसमानध्वनिर्यो मृदङ्गः पटुना पुरुषेण प्रवादितः स चेति द्वन्द्वः, ततस्तेषां यो रवस्तेनेति, इति कट्टु इतिकृत्वा एवमभिधाय जय-जयशब्दं प्रयुङ्क्ते श्रेणिकराज इति प्रकृतम्।" इति ज्ञाताधर्मकथाटीकायाम् पृ० ५५ A।

पृ० ४९ पं० १५. महता जाव विहरति। दृश्यतां पृ० ३ पं० १ इत्यत्र वर्णकः।

"महया इह यावत्करणात् एवं वर्णको वाच्यः—महयाहिमवंतमहंतमलयमंदरमहिंदसारे अच्चंतविसुद्धदीहरायकुलवंससुपसूए निरंतरं रायलक्खणविराइयंगमंगे बहुजणबहुमाणपूइए सव्वगुणसमिद्धे खत्तिए मुदिए मुद्धाभिसित्ते पित्रादिभिर्मूर्धन्यभिषिक्तत्वात्, माउपिउसुजाए, दयपत्ते दयावानित्यर्थः, सीमंकरे मर्यादाकारित्वात्, सीमंधरे कृतमर्यादापालकत्वात्, एवं खेमंकरे खेमंधरे, क्षेमम् अनुपद्रवता, मणुस्सिंदे जणवयपिया हितत्वात्, जणवयपुरोहिए शान्तिकारित्वात्, सेउकरे मार्गदर्शकः, केउकरे अद्भुतकार्यकारित्वात्, केतुः चिह्नम्, नरपवरे नराः प्रवराः यस्येति कृत्वा, पुरिसवरे पुरुषाणां मध्ये वरत्वात्, पुरिससीहे शूरत्वात्, पुरिसआसीविसे शापसमर्थत्वात्, पुरिसपुंडरीए सेव्यत्वात्, पुरिसवरगंधहत्थी प्रतिराजगजभञ्जकत्वात्, अड्ढे आढ्यः, दित्ते दर्पवान्, वित्ते प्रतीतः, विच्छिन्नविउलभवणसयणासणजाणवाहणाइण्णे, विस्तीर्णविपुलानि अतिविस्तीर्णानि भवन-शयनासनानि यस्य स तथा, यानवाहनान्याकीर्णानि गुणवन्ति यस्य स तथा, ततः कर्मधारयः, बहुधणबहुजायरूवरयए, बहु धनं गणिमादिकं बहुनी च जातरूप-रजते यस्य स तथा, आयोगपयोगसंपउत्ते, आयोगस्य अर्थलाभस्य प्रयोगा उपायाः सम्प्रयुक्ता व्यापारिता येन स तथा, विच्छड्डियपउरभत्तपाणे, विच्छर्दिते त्यक्ते बहुजनभोजनदानेनावशिष्टोच्छिष्टसम्भवात् सञ्जातविच्छर्दे वा नानाविधभक्तिके भक्तपाने यस्य स तथा, बहुदासीदासगोमहिसगवेलगप्पभूए, बहुदासीदासश्चासौ गोमहिषीगवेलगप्रभूतश्चेति समासः, गवेलका उरभ्राः, पडिपुण्णजंतकोसकोट्ठागाराउहागारे, यन्त्राणि पाषाणक्षेपयन्त्रादीनि, कोशो भाण्डागारम्, कोष्ठागारं धान्यगृहम्, आयुधागारं प्रहरणशाला, बलवं, दुब्बलपच्चामित्ते, प्रत्यमित्राः प्रातिवेशिकाः, ओहयकंटयं निहयकंटयं मलियकंटयं उद्धियकंटयं अकंटयं, कण्टकाः प्रतिस्पर्धिनो गोत्रजाः, उपहता विनाशनेन, निहताः समृद्ध्यपहारेण, मलिताः मानभञ्जनेन, उद्धृता देशनिर्वासनेन, अत एवाकण्टकमिति, एवं उवहयसत्तुमित्यादि, नवरं शत्रवोऽगोत्रजा इति, ववगयदुब्भिक्खमारिभयविप्पमुक्कं खेमं सिवं सुभिक्खं पसंतडिंबडमरं, अन्वयव्यतिरेकाभिधानस्य शिष्टसंमतत्वात् न पुनरुक्ततादोषोऽत्र, रज्जं पसाहेमाणे विहरइ त्ति।" इति ज्ञाताधर्मकथाटीकायाम् पृ० ५५।

पृ० ५४ पं० ८. दप्पण जाव बहवे। "दप्पण त्ति आदर्शः, इह यावत्करणादिदं दृश्यम्—तयाणंतरं च णं पुण्णकलसभिंगारा दिव्वा य छत्तपडागा सचामरा दंसणरइयआलोइयदरिसणिज्जा वाउद्धुयविजयंती य ऊसिया गगणतलमणुलिहंती पुरओ अहाणुपुव्वीए संपट्ठिया।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तयाणंतरं च वेरुलियभिसंतविमलदंडं पलंबकोरेंटमल्लदामोवसोहियं चंदमंडलनिभं विमलं आयवत्तं पवरं सीहासणं च मणिरयणपायपीढं सपाउयाजोयसमाउत्तं बहुकिंकरकम्मकरपुरिसपायत्तपरिक्खित्तं पुरओ अहाणुपुव्वीए संपट्ठियं।

तयाणंतरं च णं बहवे लट्ठिग्गाहा कुंतग्गाहा चावग्गाहा धयग्गाहा चामरग्गाहा कुमरग्गाहा पोत्थयग्गाहा फलयग्गाहा पीढयग्गाहा वीणग्गाहा कूवग्गाहा हडप्पग्गाहा पुरओ अहाणुपुव्वीए संपट्ठिया।

तयाणंतरं च णं बहवे दंडिणो मुंडिणो सिहंडिणो पिंछिणो हासकरा डमरकरा चाडुकरा कीडंता य वायंता य गायंता य नच्चंता य हासंता य सोहंता य साविंता य रक्खंता य आलोयं च करेमाणा जयजयसद्दं च पउंजमाणा पुरओ अहाणुपुव्वीए संपट्ठिया।

तयाणंतरं च णं जच्चाणं तरमल्लिहायणाणं थासगअहिलाणाणं चामरगंडपरिमंडियकडीणं अट्ठसयं वरतुरगाणं पुरओ अहाणुपुव्वीए संपट्ठियं।

तयाणंतरं च णं ईसिदंताणं ईसिमत्ताणं ईसिउच्छंगविसालधवलदंताणं कंचणकोसीपविट्ठदंताणं अट्ठसयं गयाणं पुरओ अहाणुपुव्वीए संपट्ठियं।

तयाणंतरं च णं सछत्ताणं सज्झयाणं सघंटाणं सपडागाणं सतोरणवराणं सनंदिघोसाणं सखिंखिणीजालपरिक्खित्ताणं हेमवयचित्ततिणिसकणकनिजुत्तदारुयाणं कालायससुकयनेमिजंतकम्माणं सुसिलिट्ठवित्तमंडलधुराणं आइण्णवरतुरगसंपउत्ताणं कुसलनरछेयसारहिसुसंपरिग्गहियाणं बत्तीसतोरणपरिमंडियाणं सकंकडवडेंसकाणं सचावसरपहरणावरणभरियजुद्धसज्जाणं अट्ठसयं रहाणं पुरओ अहाणुपुव्वीए संपट्ठियं।

तयाणंतरं च णं असिसत्तिकोंततोमरसूलउडभिंडिमालधणुपाणिसज्जं पायत्ताणियं पुरओ अहाणुपुव्वीए संपट्ठियं।

तए णं से मेहे कुमारे हारोत्थयसुकयरइयवच्छे कुंडलुज्जोइयाणणे मउडदित्तसिरए अब्भहियरायतेयलच्छीए दिप्पमाणे सकोरेंटमल्लदामेणं छत्तेणं धरिज्जमाणेणं सेयवरचामराहिं उद्धुव्वमाणीहिं हयगयपवरजोहकलियाए चाउरंगिणीए सेणाए समणुगम्ममाणमग्गे जेणेव गुणसिलए चेइए तेणेव पहारेत्थ गमणाए।

तए णं तस्स मेहस्स कुमारस्स पुरओ महं आसा आसधरा उभओ पासे नागा नागधरा करिवरा पिट्ठओ रहा रहसंगेल्ली।

तए णं से मेहे कुमारे अब्भागयभिंगारे पग्गहियतालियंटे ऊसवियसेयच्छत्ते पवीजियवालवीयणीए सव्विड्ढीए सव्वजुईए सव्वबलेणं सव्वसमुदएणं सव्वादरेणं सव्वविभूईए सव्वविभूसाए सव्वसंभमेणं सव्वगंधपुप्फमल्लालंकारेणं सव्वतुडिय-सद्दसन्निनाएणं महया इड्ढीए महया जुईए महया बलेणं महया समुदएणं महया वरतुडियजमगसमगपवाइएणं संख-पणव-पडह-भेरि-झल्लरि-खरमुहि-हुडुक्क-मुरव-मुइंग-दुंदुभिनिग्घोसनाइयरवेणं रायगिहस्स नगरस्स मज्झंमज्झेणं निग्गच्छमाणस्स बहवे अत्थत्थिया कामत्थिया भोगत्थिया लाभत्थिया किब्बिसिया करोडिया कारवाहिया संखिया चक्किया लंगलिया मुहमंगलिया पूसमाणवा वद्धमाणगा ताहिं इट्ठाहिं कंताहिं पियाहिं मणुन्नाहिं मणामाहिं मणाभिरामाहिं हिययगमणिज्जाहिं वग्गूहिं ति।

अयमस्यार्थः—तदनन्तरं च छत्रस्योपरि पताका छत्रपताका, सचामरा चामरोपशोभिता, तथा दर्शनरतिदा दृष्टिसुखदा, आलोके दृष्टिविषये क्षेत्रे स्थिताऽत्युच्चतया दृश्यते या सा आलोकदर्शनीया, ततः कर्मधारयः, अथवा दर्शने दृष्टिपथे मेघकुमारस्य रचिता धृता या आलोकदर्शनीया च या सा तथा, वातोद्धूता विजयसूचिका च या वैजयन्ती पताकाविशेषः, सा तथा, सा च ऊसिया उच्छ्रिता उर्द्धीकृता पुरतः अग्रतः यथानुपूर्वी क्रमेण सम्प्रस्थिता प्रचलिता, भिसंत

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्ति दीप्यमानः, **मणिरत्नानां** सम्बन्धि **पादपीठं** यस्य सिंहासनस्य तत्तथा, **स्वेन** स्वकीयेन मेघकुमारसम्बन्धिना **पादुकायुगेन समायुक्तं** यत्तथा, **बहुभिः किङ्करैः** किं कुर्वाणैः **कर्मकरपुरुषैः पादातेन** च पदातिसमूहेन शस्त्रपाणिना **परिक्षिप्तं** यत्तथा, **कुय** त्ति कुतुपः, **हडप्पो** त्ति आभरण-करण्डकम्, **मुंडिणो** मुण्डिताः, **छिहंडिणो** शिखावन्तः, **डमरकराः** परस्परेण कलहविधायकाः, **चाटुकराः** प्रियंवदाः, **सोहंता य** त्ति शोभां कुर्वन्तः, **सावंता य** त्ति श्रावयन्तः आशीर्वचनानि, रक्षन्तः न्यायम्, **आलोकं च कुर्वाणाः** मेघकुमारं तत्समृद्धिं च पश्यन्तः।

**जात्यानां** काम्बोजादिदेशोद्भवानां **तरोमल्लिनो** बलाधायिनो वेगाधायिनो वा **हायनाः** संवत्सरा येषां ते तथा तेषाम्, अन्ये तु **भायल** त्ति मन्यन्ते, तत्र **भायला** जात्यविशेषा एवेति, **गमनिकै-**वैषा, **थासका** दर्पणाकाराः **अहिलाणानि च** कविकानि येषां सन्ति ते तथा, मतुब्लोपात्, **चामरगंडा** चामरदण्डास्तैः **परिमण्डिता कटी** येषां ते तथा तेषाम्।

**ईषद्दान्तानां** मनाग् ग्राहितशिक्षाणामीषन्मत्तानां नातिमत्तानाम्, ते हि जनमुपद्रवयन्तीति, **ईषत्** मनागुत्सङ्गः **इषोत्सङ्गः** पृष्ठिदेशस्तत्र **विशाला** विस्तीर्णा **धवलदन्ताश्च** ये ते तथा तेषाम्, **कोशी** प्रतिमा।

**नन्दिघोषः** तूर्यनादः, अथवा **सुनन्दी** सत्समृद्धिको घोषो येषां ते तथा तेषाम्, **सकिङ्किणि** सक्षुद्रघण्टिकं **यज्जालं** मुक्ताफलादिमयं तेन परिक्षिता ये ते तथा तेषाम्, तथा **हैमवतानि** हिमवत्पर्वतोद्भवानि **चित्राणि तिनिशस्य** वृक्षविशेषस्य सम्बन्धीनि **कनकनियुक्तानि** हेमखचितानि **दारूणि** काष्ठानि येषां ते तथा, तेषाम्, **कालायसेन** लोहविशेषेण **सुष्ठु कृतं नेमेः** गण्डमालायाः **यन्त्राणां च** रथोपकरणविशेषाणां **कर्म** येषां ते तथा, तेषाम्, **सुश्लिष्टे वित्त** त्ति वेत्रदण्डवत् **मण्डले** वृत्ते **धुरौ** येषां ते तथा, तेषाम्। **आकीर्णा** वेगादिगुणयुक्ताः ये वरतुरगास्ते **सम्प्रयुक्ता** योजिता येषु ते तथा, तेषाम्, कुशलतराणां मध्ये ये **छेकाः** दक्षाः **सारथयस्तैः सुसम्परि-गृहीता** ये ते तथा, तेषाम्, **तोण** त्ति शरभस्त्राः, **सह कण्टकैः** कवचैर्वैशैश्च वर्तन्ते ये ते तथा, तेषाम्, **सचापाः** धनुर्युक्ता ये **शराः प्रहरणानि** च खड्गादीनि **आवरणानि च** शीर्षकादीनि तैर्ये **भृता युद्धसज्जाश्च** युद्धप्रगुणाश्च ये ते तथा, तेषाम्।

**लउड** त्ति **लकुटाः** अस्यादिकानि **पाणौ** हस्ते यस्य तत्तथा तच्च **तत्सज्जं** च प्रगुणं युद्धस्येति गम्यते, **पादातानीकं** पदातिकटकम्।

हारावस्तृतं सुकृतिरतिकं विहितसुखं वक्षो यस्य स तथा, मुकुटदीप्तशिरस्कः, **पहारेत्थ गमणयाए** त्ति गमनाय **प्रधारितवान्** सम्प्रधारितवान्। **मह** त्ति महान्तः अश्वाः, **अश्वधराः** ये अश्वान् धारयन्ति, **नागा** हस्तिनः, **नागधरा** ये हस्तिनो धारयन्ति, क्वचिद् **धरा** इति पाठः, तत्राश्वा नागाश्च किंविधाः? **अश्ववरा** अश्वप्रधानाः, एवं नागवराः, तथा रथाः, **रथसंवेल्ली** रथमाला, क्वचित् **रहसंगेल्लीति** पाठः, तत्र **रथसङ्गेल्ली** रथसमूहः।

**तए णं से मेहे कुमारे अब्भागयभिंगारे** इत्यादि वर्णकोपसंहारवचनमिति न पुनरुक्तम्। **सव्विड्ढीए** इत्यादि दोहदावसरे व्याख्यातम्। **शङ्खः** प्रतीतः, **पणवो** भाण्डानां **पटहः**, पटहस्तु प्रतीत एव, **भेरी** ढक्काकारा, **झल्लरी** वलयाकारा, **खरमुही** काहला, **हुडुक्का** प्रतीता, महाप्रमाणो मर्दलो **मुरजः**, स एव लघुर्मृदङ्गः, **दुन्दुभिः** मेर्याकारा सङ्कटमुखी, एतेषां **निर्घोषो** महाध्वानो **नादितं** च घण्टायामिव वादनोत्तरकालभावी सततध्वनिः, तल्लक्षणो यो **रवस्तेन**, **अर्थार्थिनो** द्रव्यार्थिनः, **कामार्थिनः** शब्दरूपार्थिनः, **भोगार्थिनः** गन्धरसस्पर्शार्थिनः, **लाभार्थिनः** सामान्येन लाभैषिणः, **किल्बिषिकाः** पातकफलवन्तो निःस्वान्धपङ्ग्वादयः, **कारोटिकाः** कापालिकाः, **कारो** राजदेयं द्रव्यम्, तद् वहन्ति ये ते **कारवाहिकाः**, कारेण वा **बाधिताः** पीडिता ये ते कारबाधिताः, शङ्खवादनं शिल्पमेषामिति **शाङ्खिकाः**, शङ्खो वा विद्यते येषां मङ्गल्यचन्दनाधारभूतः ते

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शाङ्खिकाः, चक्रं प्रहरणमेषामिति **चाक्रिकाः** योद्धारः, चक्रं वास्ति येषां ते **चाक्रिकाः** कुम्भकार-तैलिकादयः, चक्रं वोपदर्श्य याचन्ते ये ते **चाक्रिकाः** चक्रधरा इत्यर्थः, **लाङ्गलिकाः** हालिकाः, लाङ्गलं वा प्रहरणं येषां गले वा लम्बमानं सुवर्णादिमयं तद्येषां ते **लाङ्गलिकाः** कार्पटिकविशेषाः, **मुखमङ्गलानि** चाटुवचनानि ये कुर्वन्ति ते **मुखमङ्गलिकाः**, **पुष्पमागवा** नग्नाचार्याः, **वर्धमानकाः** स्कन्धारोपितपुरुषाः, **इट्ठाहीत्यादि** पूर्ववत्, **जियविग्घो वि य वसाहि त्ति** इहैवं सम्बन्धः—अपि च जितविघ्नः त्वं हे देव! अथवा देवानां सिद्धेश्च मध्ये वस आस्व।" इति **ज्ञाताधर्मकथाटीकायाम्** पृ० ५७।

पृ० ७५ पं० ४. **इट्ठं कंतं पियं जाव विविहा...।** अत्र औपपातिकसूत्रे ईदृशः पाठः—"**जं पि य इमं सरीरं इट्ठं कंतं पियं** मणुण्णं मणामं पेज्जं वेसासियं संमतं बहुमतं अणुमतं भंडकरंडगसमाणं मा णं सीयं मा णं उण्हं मा णं खुहा मा णं पिवासा मा णं वाला मा णं चोरा मा णं दंसा मा णं मसगा मा णं वातिय-पित्तिय-सिंभिय-संनिवाइय विविहा रोगातंका परीसहोवसग्गा फुसंतु त्ति कट्टु एयं पि णं चरमेहिं ऊसासणीसासेहिं वोसिरामि त्ति कट्टु संलेहणाझूसिया भत्तपाणपडियाइक्खिया पाओवगया कालं अणवकंखमाणा विहरंति।"

अस्य आचार्यश्री **अभयदेवसूरिविरचिता** टीका—"**इट्ठं** ति वल्लभं **कंतं** ति कान्तं काम्यत्वात् **पियं** ति प्रियं सदा प्रेमविषयत्वात् **मणुण्णं** ति मनोज्ञं सुन्दरमित्यर्थः, **मणामं** ति मनसा अम्यते प्राप्यते पुनः पुनः संस्मरणतो यत् तत् **मनोऽमम्**, **पेज्जं** ति सर्वपदार्थानां मध्येऽतिशयेन प्रियत्वात् **प्रेयः**, प्रकर्षेण वा इज्या पूजाऽस्येति **प्रेज्यम्**, **प्रेर्यं** वा कालान्तरनयनात्। **थेज्जं** ति क्वचित्, तत्र **स्थैर्यम्** अस्थिरेऽपि मूढैः स्थैर्यसमारोपणात्, **वेसासियं** ति विश्वासः प्रयोजनमस्येति **वैश्वासिकम्**, परशरीरमेव हि प्रायेणाऽविश्वासहेतुर्भवतीति, **संमयं** ति सम्मतम् तत्कृतकार्याणां सम्मतत्वात्, **बहुमयं** ति बहुशो बहूनां वा मध्ये मतमिष्टं यत् तद् **बहुमतम्**, **अणुमयं** ति वैगुण्यदर्शनस्यापि पश्चाद् मतमनुमतम्, **भंडकरंडगसमाणं** ति आभरणकरण्डकतुल्यम्, उपादेयमित्यर्थः, तथा **मा णं सीयमित्यादि** व्यक्तम्, नवरं माशब्दो निषेधार्थः, णंकारो वाक्यालङ्कारार्थः इह च 'स्पृशन्तु' इति यथायोगं योजनीयम्, अथवा **मा णं** ति मा एतच्छरीरमिति व्याख्येयम्, **मा णं वाल** त्ति व्यालाः श्वापद-भुजगाः, **रोगायंक** त्ति रोगाः कालसहा व्याधयः, **आतङ्काः** त एव सद्योघातिनः, **परीसहोवसग्ग** त्ति परीषहाः क्षुदादयो द्वात्रिंशतिः, **उपसर्गा** दिव्यादयः, **फुसंतु** स्पृशन्तु, **इति कट्टु** त्ति इति, कृत्वा इत्येवमभिसन्धाय, यत् पालितमिति शेषः, **एयं पि णं** ति एतदपि शरीरं **वोसिरामि त्ति कट्टु** त्ति इत्यत्र **त्ति कट्टु** त्ति इति कृत्वा इति विसर्जनं विधाय 'विहरन्ति' इति योगः, **संलेहणाझूसिय** त्ति संलेखना शरीरस्य तपसा कृशीकरणम्, तां तया वा **झूसिय** त्ति जुष्टा वा सेविताः ये ते तथा, **संलेहणाझूसणाझूसिय** त्ति क्वचित्, तत्र संलेखनायां कषाय-शरीरकृशीकरणे या जोषणा प्रीतिः सेवा वा "जुषी प्रीति-सेवनयोः" [पा० धा० १२८९] इति वचनात्, सा तथा, तया तां वा ये जुष्टाः सेवितास्ते तथा, संलेखनाजोषणाया वा **झूसिय** त्ति झूषिताः क्षीणा ये ते तथा, **भत्तपाणपडियाइक्खिय** त्ति प्रत्याख्यातभक्तपानाः, **पाओवगया** पादपोपगताः, वृक्षवद् निष्पन्दतया अवस्थिता इत्यर्थः, **कालं अणवकंखमाण** त्ति मरणमनवकाङ्क्षन्त इत्यर्थः, आकाङ्क्षन्ति हि मरणमतिकष्टं गताः केचनेति तन्निषेध उक्तः" इति **औपपातिकसूत्रवृत्तौ**।

पृ० ७५ पं० १७. **पगइभद्दए जाव विणीते।** "**पगइभद्दए** इत्यत्र यावत्करणादेवं दृश्यम्—**पगइउवसंते पगइपयणुकोहमाणमायालोभे मिउमद्दवसंपन्ने आलीणे भद्दए विणीए** त्ति, तत्र

१. दृश्यतामस्मिन्नेव परिशिष्टे पृ० ८ पं० १-२ इत्यस्य टिप्पणम्॥

Jain Education International  For Private & Personal Use Only  www.jainelibrary.org

प्रकृत्यैव स्वभावेनैव भद्रकः अनुकूलवृत्तिः, प्रकृत्यैवोपशान्तः उपशान्ताकारः, मृदु च तन्मार्दवं च मृदुमार्दवम् अत्यन्तमार्दवम् इत्यर्थः, आलीनः आश्रितो गुरुम् अनुशासनेऽपि च भद्रक एव यः स तथा।" इति ज्ञाताधर्मकथाटीकायाम् पृ० ७७।

पृ० ७७ पं० १५—पृ० ७८ पं० ४. **अड्ढे दित्ते जाव विउलभत्तपाणे।...चारुवेसा जाव-पडिरूवा।** "**अड्ढे दित्ते**, इह यावत्करणादिदं द्रष्टव्यम्—**विच्छिण्णविउलभवणसयणासणजाण-वाहणाइन्ने बहुदासदासीगोमहिसगवेलगप्पभूए बहुधणबहुजायरूवरयए आओगपओगसंपउत्ते विच्छड्डियविउलभत्तपाणे** त्ति, व्याख्या त्वस्य मेघकुमारराजवर्णकवत्, भद्रावर्णकस्य तु धारिणी-वर्णकवत्।" इति ज्ञाताधर्मकथाटीकायाम् पृ० ८०। द्रष्टव्यमस्मिन्नेव परिशिष्टे पृ० ३ पं० १ इत्यस्य टिप्पणम्, तथा पृ० ८ पं १-२ इत्यस्य टिप्पणम्।

पृ० ८४ पं० ४. **मित्त-नाति०**। अत्र '**मित्त-नाति-नियग-संबंधि-परिजणं**' इति सम्पूर्णः पाठः।

पृ० ९१ पं० ११. **काले कालोभासे जाव वेयणं**। "**काले कालोभासे** इत्यादि **कालः** कृष्णवर्णः काल एवावभासते द्रष्टॄणां कालो वाऽवभासो दीप्तिर्यस्य स कालावभासः, इह यावत्करणादिदं दृश्यम्—**गंभीरलोमहरिसे भीमे उत्तासणए परमकण्हे वण्णेणं, से णं तत्थ निच्चं भीए, निच्चं तत्थे, निच्चं तसिए, निच्चं परमसुहसंबद्धं नरगं** त्ति, तत्र **गम्भीरो** महान्, **रोमहर्षो** भयसम्भूतो रोमाञ्चो यस्य यतो वा सकाशात् स तथा, किमित्येवमित्याह—**भीमो** भीष्मः, अत एवोत्त्रासकारित्वादुत्त्रासकः, एतदपि कुत इत्याह—**परमकृष्णो** वर्णेनेति, **परां** प्रकृष्टाम् **अशुभसम्बद्धां** पापकर्मणोपनीताम्।" इति ज्ञाताधर्मकथाटीकायाम् पृ० ८९।

पृ० ११३ पं० ८. **इरियासमिते भासासमिते जाव विहरति**। "**ईरियासमिए** इत्यादि, इह यावत्करणादिदं दृश्यम्—**एसणासमिए आयाणभंडमत्तनिक्खेवणासमिए, आदानेन** ग्रहणेन सह **भाण्डमात्राया** उपकरणलक्षणपरिच्छदस्य या **निक्षेपणा** मोचनं तस्यां **समितः** सम्यक् प्रवृत्तिमान्, **उच्चारपासवणखेलसिंघाणजल्लपारिट्ठावणियासमिए, उच्चारः** पुरीषम्, **प्रश्रवणं** मूत्रम्, **खेलो** निष्ठीवनम्, **सिङ्घानो** नासामलः, **जल्लः** शरीरमलः, **मणसमिए वयसमिए कायसमिए**, चित्तादीनां कुशलानां प्रवर्तक इत्यर्थः, **मणगुत्ते, वइगुत्ते कायगुत्ते**, चित्तादीनामशुभानां निषेधकः, अत एवाह—**गुत्ते** योगापेक्षया, **गुत्तिंदिए** इन्द्रियाणां विषयेष्वसत्प्रवृत्तिनिरोधात्, **गुत्तबंभचारी** वसत्यादि-नवब्रह्मचर्यगुप्तियोगात्, **अकोहे अमाणे अमाए अलोभे**।

कथमित्याह—**संते** सौम्यमूर्तित्वात्, **पसंते** कषायोदयस्य विफलीकरणात्, **उपसंते** कषायोदयाभावात्, **परिनिव्वुडे** स्वास्थ्यातिरेकात्, **अणासवे** हिंसादिनिवृत्तेः, **अममे** ममेत्यु-ल्लेखस्याभिष्वङ्गतोऽप्यसद्भावात्, **अकिंचणे** निर्द्रव्यत्वात्, **छिन्नगंथे** मिथ्यात्वादिभावग्रन्थच्छेदात्, **निरुवलेवे** तथाविधबन्धहेत्वभावेन तथाविधकर्मानुपादानात्, एतदेवोपमानैरुच्यते—**कंसपाई व मुक्कतोए** बन्धहेत्वभावेन तोयाकारस्य स्नेहस्याभावात्, **संखो इव निरंजणे, रञ्जनस्य** रागस्य कर्तुमशक्यत्वात्, **जीवो विव अप्पडिहयगई** सर्वत्रौचित्येनास्खलितविहारित्वात्, **गगणमिव निरालंबणे** देश-ग्राम-कुलादीनामनालम्बकत्वात्, **वायुरिव अपडिबद्धे** क्षेत्रादौ प्रतिबन्धाभावेनौ-चित्येन सततविहारित्वात्, **सारयसलिलं व सुद्धहियए** शाठ्यलक्षणगडुलत्ववर्जनात्, **पुक्खरपत्तं पिव निरुवलेवे** पद्मपत्रमिव भोगाभिलाषलेपाभावात्, **कुम्मो इव गुत्तिंदिए, कूर्मः** कच्छपः, **खग्गिविसाणं व एगजाए, खड्गिः** आरण्यः पशुविशेषः, तस्य **विषाणं** शृङ्गम्, तदेकं भवति, तद्वदेको जातो योऽसङ्गतः सहायत्यागेन स तथा, **विहग इव विप्पमुक्के** आलयाप्रतिबन्धेन, **भारंडपक्खी व अप्पमत्ते**, भारण्डपक्षिणो हि एकोदराः पृथग्ग्रीवा अनन्यफलभक्षिणो जीवद्वयरूपा भवन्ति, ते च सर्वदा चकितचित्ता भवन्तीति, **कुंजरो इव सोंडीरे**, कर्मशत्रुसैन्यं प्रति शूर इत्यर्थः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वसभो इव जायत्थामे, आरोपितमहान्तभारवहनं प्रति जातबलो निर्वाहकत्वात्, सीहो इव दुद्धरिसे दुर्धर्षणीयः उपसर्गमृगैः, मंदरो इव निप्पकंपे परीषहपवनैः, सागरो इव गंभीरे अतुच्छचित्तत्वात्, चंदो इव सोमलेसे शुभपरिणामत्वात्, सूरो इव दित्ततेए परेषां क्षोभकत्वात्, जच्चकंचणं व जायरूवे अपगतदोषलक्षणकुद्रव्यत्वेनोत्पन्नस्वस्वभावः, वसुंधरा इव सव्वफासविसहो पृथ्वीवत् शीतातपाद्यनेकविधस्पर्शक्षमः, सुहुयहुयासणो व्व तेजसा जलंते घृतावितर्पितवैश्वानरवत् प्रभया दीप्यमानः।

नत्थि णं तस्स भगवंतस्स कत्थइ पडिबंधो भवइ नास्त्ययं पक्षो यदुत तस्य प्रतिबन्धो भवति। से य पडिबंधे चउव्विहे पण्णत्ते, तंजहा—दव्वओ खेत्तओ कालओ भावओ. दव्वओ सचित्ताचित्तमीसेसु, खेत्तओ गामे वा नगरे वा रण्णे वा खले वा घरे वा अंगणे वा, खलं धान्यमलनादि स्थण्डिलम्, कालओ समए वा आवलियाए वा असंख्यातसमयरूपायाम्, आणापाणूए वा उच्छ्वासनिःश्वासकाले, थोवे वा सप्तोच्छ्वासरूपे, खणे वा बहुतरोच्छ्वासरूपे, लवे वा सप्तस्तोकरूपे, मुहुत्ते वा लवसप्तसप्ततिरूपे, अहोरत्ते वा पक्खे वा मासे वा, अयणे वा दक्षिणायनेतररूपे प्रत्येकं षण्मासप्रमाणे, संवत्सरे वा, अन्नतरे वा दीहकालसंजोए युगादौ। भावओ कोहे वा माणे व मायाए वा लोहे वा भये वा, हासे वा हास्ये हर्षे वा, एवं तस्स न भवइ एवमनेकधा तस्य प्रतिबन्धो न भवति।

से णं भगवं वासीचंदणकप्पे वास्यां चन्दनकल्पो यः स तथा, अपकारिणोऽप्युपकारकारीत्यर्थः वासीं वा अङ्गच्छेदनप्रवृत्तां चन्दनं कल्पयति यः स तथा, समतिणमणिलेट्ठुकंचणे समसुहदुक्खे, समानि उपेक्षणीयतया तृणादीनि यस्य स तथा, इहलोगपरलोगऽपडिबद्धे जीवियमरणे निरवकंखे संसारपारगामी कम्मनिग्घायणट्ठाए अब्भुट्ठिए एवं च णं विहरइ त्ति।" इति ज्ञाताधर्मकथाटीकायाम् पृ० १०३।

पृ० १०८ पं० ५. अट्ठा जाव। दृश्यतां पृ० ७७ पं० १५ इत्यस्य टिप्पणमत्रैव परिशिष्टे।

पृ० ११४ पं० ४. अहिगयजीवाजीवे जाव अप्पाणं। "इह यावत्करणादिदं दृश्यम्—उवलद्धपुण्णपावे आसवसंवरनिज्जरकिरियाहिगरणबंधमोक्खकुसले, क्रिया कायिक्यादिका, अधिकरणं खड्गनिर्वर्तनादि, एतेन च ज्ञानितोक्ता।" इति ज्ञाताधर्मकथाटीकायाम् पृ० १०९ A॥

पृ० १३२ पं० ५. अट्ठे। दृश्यतामस्मिन्नेव परिशिष्टे पृ० ७७ पं० १५ इत्यस्य टिप्पणम्।

पृ० १४२ पं० ४. धम्मं सोच्चा०। दृश्यतां पृ० ४३ पं० ९।

पृ० १४७ पं० ४. जाव नंदीसरवरे दीवे महिमा।

"किंपर्यवसानं जन्म वक्तव्यमित्याह—यावन्नन्दीश्वरे महिम त्ति। अतिदिष्टग्रन्थश्चार्थेत एवं द्रष्टव्यो यथा—अष्टौ दिक्कुमारीमहत्तरिकाः भोगङ्कराप्रभृतयस्तत्समयमुपजातसिंहासनप्रकम्पाः प्रयुक्तावधिज्ञानाः समवसितैकोनविंशतितमतीर्थनाथजननाः ससम्भ्रममनुष्ठितसमवायाः समस्तजिननायकजन्मसु महामहिमविधानमस्माकं जीतमिति विहितनिश्चयाः स्वकीयस्वकीयाभियोगिकदेवविहितदिव्यविमानारूढाः सामानिकादिपरिकरपरिवृताः सर्वर्द्ध्या मल्लिजिनजन्मनगरीमागम्य जिनजन्मभवनं यानविमानैस्त्रिः प्रदक्षिणीकृत्य उत्तरपूर्वस्यां दिशि यानविमानानि चतुर्भिरङ्गुलैर्भुवमप्राप्तानि व्यवस्थाप्य जिनसमीपं जिनजननीसमीपं च गत्वा त्रिः प्रदक्षिणीकृत्य कृतप्राञ्जलिपुटा इदमवादिषुः—नमोऽस्तु ते रत्नकुक्षिधारिके! नमोऽस्तु ते जगत्प्रदीपदायिके! वयमधोलोकवास्तव्या दिक्कुमार्यो जिनस्य जन्ममहिमानं विधास्यामः, अतो युष्माभिर्न भेतव्यमिति अभिधाय च विहितसंवर्तवाताः जिनजन्मभवनस्य समन्ताद् योजनपरिमण्डलक्षेत्रस्य तृण-पत्र-कचवरादेरशुचिवस्तुनोऽपनयनेन विहितशुद्धयोर्जिनजनन्योरदूरतो जिनस्यासाधारणमगणितगुणगणमागायन्त्यस्तस्थुः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवमेवोर्ध्वलोकवास्तव्याः, नन्दनवनकूटनिवासिन्य इत्यर्थः, अष्टौ दिक्कुमारीमहत्तरिकास्तथैवागत्य विरचिताभ्रवर्दलकाः आयोजनमानक्षेत्रं गन्धोदकवर्षं पुष्पवर्षं धूपघटीश्च कृत्वा जिनसमीपमागत्य परिगायन्त्य आसाञ्चक्रुः। तथा पौरस्त्यरुचकवास्तव्याः, रुचकाभिधानस्य त्रयोदशस्य द्वीपस्य मध्यवर्तिनः प्राकाराकारेण मण्डलव्यवस्थितस्योपरि पूर्वदिग्व्यवस्थितेष्वष्टासु कूटेषु कृतनिवासा इत्यर्थः, आगत्य तथैवादर्शहस्ता गायन्त्यस्तस्थुः। एवं दक्षिणरुचकवास्तव्या जिनस्य दक्षिणेन भृङ्गारहस्ताः, पश्चिमरुचकवास्तव्या जिनस्य पश्चिमेन तालवृन्तहस्ताः, उत्तररुचकवास्तव्याश्चामरहस्ता जिनस्य उत्तरेण, एवं चतस्रो रुचकस्य विदिग्वास्तव्या आगत्य दीपिकाहस्ता जिनस्य चतसृषु विदिक्षु तथैव तस्थुः। मध्यमरुचकवास्तव्याः, रुचकद्वीपस्याभ्यन्तरार्धवासिन्य इत्यर्थः, चतस्रस्तास्तथैवागत्य जिनस्य चतुरङ्गुलवर्जनाभिनालच्छेदनं च विवरखननं च नाभिनालनिधानं च विवरस्य रत्नपूरणं च तदुपरि हरितालिकापीठबन्धं च पश्चिमावर्जदिक्त्रये कदलीगृहत्रयं च तन्मध्येषु चतुःशालभवनत्रयं च तन्मध्यदेशे सिंहासनत्रयं च दक्षिणे सिंहासने जिनजनन्योरुपवेशनं च शतपाकादितैलाभ्यञ्जनं च गन्धद्रव्योद्वर्तनं च पुष्पोदकं च पूर्वत्र पुष्पोदक-गन्धोदक-शुद्धोदकमज्जनं च सर्वालङ्कार-विभूषणं च उत्तरत्र गोशीर्षचन्दनकाष्ठैर्वह्न्युज्ज्वलनं चाग्निहोमं च भूतिकर्म च रक्षापोट्टलिकां च मणिमयपाषाणद्वयस्य जिनकर्णाभ्यर्णे प्रताडनं च 'भवतु भगवान् पर्वतायुः' इति भणनं च पुनः समातृकजिनस्य स्वभवननयनं च शय्याशायनं च चक्रुः, कृत्वा च गायन्त्यस्तस्थुरिति।

सौधर्मकल्पे च शक्रस्य सहसा आसनं प्रचकम्पे, अवधिं चासौ प्रयुयुजे, तीर्थकरजन्म चालुलोके, ससम्भ्रमं च सिंहासनादुत्तस्थौ, पादुके च मुमोच, उत्तरासङ्गं च चकार, सप्ताष्टानि च पदानि जिनाभिमुखमुपजगाम, भक्तिभरनिर्भरो यथाविधि जिनं च ननाम, पुनः सिंहासनमुपविवेश, हरिणेगमेषिदेवं पदात्यनीकाधिपतिं शब्दयाञ्चकार, तं चादिदेश, यथा—सुधर्मायां सभायां योजन-परिमण्डलां सुघोषाभिधानां घण्टां त्रिस्ताडयन्नुद्घोषणां विधेहि, यथा—भो भो देवा! गच्छति शक्रो जम्बूद्वीपं तीर्थकरजन्ममहिमानं कर्तुमतो यूयं सर्वसमृद्ध्या शीघ्रं शक्रस्यान्तिके प्रादुर्भवतेति, स तु तथैव चकार। तस्यां च घण्टायां ताडितायामन्यान्येकोनद्वात्रिंशद् घण्टालक्षाणि समकमेव रणरणारवं चक्रुः, उपरते च घण्टारवे घोषणामुपश्रुत्य यथादिष्टं देवाः सपदि विदधुः। ततः पालकाभिधानाभियोगिकदेवविरचिते लक्षयोजनप्रमाणे पश्चिमावर्जदिक्त्रयनिवेशिततोरणद्वारे नानामणिमयूखमञ्जरी-रञ्जितगगनमण्डले नयनमनसामतिप्रमोददायिनि महाविमानेऽधिरूढः सामानिकादिदेवकोटिभिरने-काभिः परिवृतः पुरःप्रवर्तितपूर्णकलशभृङ्गारच्छत्रपताकाचामराद्यनेकमङ्गल्यवस्तुस्तोमः पञ्चवर्णकुड-भिकासहस्रपरिमण्डितयोजनसहस्रोच्छ्रितमहेन्द्रध्वजप्रदर्शितमार्गो नन्दीश्वरद्वीपे दक्षिणपूर्वे रतिकर-पर्वते कृतावतारो दिव्यविमानर्द्धिमुपसंहरन् मिथिलां नगरीमाजगाम, विमानारूढ एव भगवतो जिनस्य जन्मभवनं त्रिः प्रदक्षिणीकृतवान्, उत्तरपूर्वस्यां दिशि चतुर्भिरङ्गुलैर्भुवमप्राप्तं विमानमवस्थापितवान्, ततोऽवतीर्य भगवन्तं समातृकं दिक्कुमारीवदभिवन्द्य जिनमातरमवस्वाप्य जिनप्रतिबिम्बं तत्सन्निधौ निधाय, पञ्चधाऽऽत्मानमाधाय, एकेन रूपेण करतलपल्लवावधृतजिनः, अन्येन जिननायकोपरि विधृतच्छत्रः, अन्याभ्यां करचालितप्रकीर्णकः, अन्येन च करकिसलयकलितकुलिशः पुरः प्रगन्ता, सुरगिरिशिखरोपरिवर्तिपण्डकवनं गत्वा तदवस्थितातिपाण्डुकम्बलाभिधानशिलासिंहासने पूर्वाभि-मुखो निषण्णः। एवमन्ये ईशानादयो वैमानिकेन्द्राश्चमरादयो भवनपतीन्द्राः कालादयो व्यन्तरेन्द्राः चन्द्र-सूर्यादयो ज्योतिष्काः सपरिवाराः मन्दरेऽवतेरुः।

ततश्चाच्युतदेवराजो जिनाभिषेकायाभियोगिकदेवानादिदेश, ते चाष्टसहस्रं सौवर्णिकानां कलशानामेवं रूप्यमयानां मणिमयानाम् एवं द्विकसंयोगवतां त्रीण्यष्टसहस्राणि त्रिसंयोगवतामष्टसहस्रं भौमेयकानां च तथाऽष्टसहस्रं चन्दनकलशानां भृङ्गाराणामादर्शानां स्थालानामन्येषां च

Jain Education International For Private & Personal Use Only www.jainelibrary.org

